The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 02 | Issue: 04 | Dec - Feb, 2026 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

# मुक्तिचिन्तामणिकाव्ये श्रीजगन्नाथतत्त्वम्

**तिलोत्तमाउगर**

शोधछात्रा, गङ्गाधरमेहेरविश्वविद्यालयः

**सारांशः**

श्रीपुरुषोत्तमदेवकृतं मुक्तिचिन्तामणिकाव्ये प्रतिपादितानि श्रीजगन्नाथतत्त्वानि स्वात्मबुद्ध्या विचारयन् जगन्नाथनिर्माल्यभक्षणफलम् इति अध्याये मोक्षविषये उल्लेखमस्ति भगवत्प्रसाद एव मोक्षसाधनम्। किन्तु भगवत्प्रसादो न सुलभः। अतः तल्लाभाय बहवः पन्थानः उपदिष्टाः शास्त्रेषु। श्रुति-स्मृति-पुराणादिषु उपलब्धानि तानि मोक्षसाधनानि सुतरां तत्त्वजिज्ञासुभिः आलोचनीयानि। तस्य सर्वश्रेष्ठकृतित्वेन विवेचितं मुक्तिचिन्तामणिकाव्ये मुक्तिः मोक्षश्च इति तत्वं प्रतिपादितं दृश्यते। मुक्तिचिन्तामणिकाव्ये मोक्षसंबद्धा नैके विषयाः उपवर्णिताः सन्ति। अस्मिन् काव्ये आराध्यदेवता श्रीजगन्नाथस्य पूजापद्धतिः, श्रीजगन्नाथतत्त्वं स्वरूपश्च विद्यते, मुक्तिविषयाः सम्यक् निरूपिताः। अस्मिन् सन्दर्भे भगवता श्रीपुरुषोत्तमदेवेन मोक्षसाधनविषये मुक्तिचिन्तामणिकाव्यं यथा उपन्यस्तं तत्सर्वमिदानीम् अत्र सविस्तारमालोच्यते।

**कूटशब्दाः-** श्रीकृष्णः, श्रीजगन्नाथः, मुक्तिः, श्रीपुरुषोत्तमदेवः, कैवल्यम्, निर्वाणम्,श्रेयः, निःश्रेयसम्, अमृतम्, मोक्षः, अपवर्गः, सार्ष्टिः, सालोक्यम्, सारूप्यम्, सायुज्यम्, निर्वाणम्।

**उपक्रमः-**

संस्कृतसाहित्ये ये केचन धीमन्तः काव्यकाराः धार्मिकक्षेत्रे निरन्तरं कर्मरताः दृश्यन्ते तेषु उत्कलप्रदेशस्य गजपति श्रीपुरुषोत्तमदेवः एकः कीर्तिमान् स्रष्टा भवति। श्रीपुरुषोत्तमदेवस्य मुक्तिचिन्तामणि मुक्तककाव्यं भवति। काव्यरचनाक्षेत्रे तस्य प्रतिभा विस्मयकारिणी भवति। श्रीपुरुषोत्तमदेवकृतं मुक्तिचिन्तामणिकाव्यं गौरवस्य स्थानमध्यारोहति। काव्येऽस्मिन् कविः श्रीजगन्नाथस्य वर्णनं कृतमस्ति तथा अस्मिन् मुक्तिचिन्तामणिकाव्ये मुक्तिप्राप्तये श्रीजगन्नाथस्य महत्त्वं प्रदाय जगन्नाथस्थितिप्रकरणम्, पुरुषोत्तमक्षेत्रमाहात्म्यम्, भगवद्दर्शनफलम्, स्नानदर्शनफलम्, जगन्नाथनिर्माल्यभक्षणफलम्, श्रीजगन्नाथतत्त्वम्, मोक्षविषये- ब्रह्मपुराणं, स्कन्दपुराणम्, अग्निपुराणम् इत्यादयः पुराणानां महत्त्वं वर्णनम् अस्ति।

मुक्तिचिन्तामणिः विषयवस्तुनः ज्ञायते यत् मुक्तिः स्त्री लिङ्गान्तं तथा एतस्य प्रकृति प्रत्ययः भवति 'मुच्' धातोः भावे क्तिन् प्रत्ययः। नैयायिकानां मतानुसारम् एतस्य अर्थः भवति आत्यन्तिक दुःखनिवृत्तिः। नित्यसुखाः-वाप्तिः इति वैदान्तिकाः, भरतेनोक्तं यत् शरीरेन्द्रियाभ्याम् आत्मनो मुक्तत्वं मुक्तिः। मोक्षः अष्टविधः यथा- १.कैवल्यम्, २.निर्वाणम्, ३.श्रेयः, ४.निःश्रेयसम्, ५.अमृतम्, ६.मोक्षः, ७.मुक्तिः, ८.अपवर्गः। पुनः मुक्तिः पञ्चविधा यथा- १.सार्ष्टिः, २.सालोक्यम्, ३.सारूप्यम्, ४.सायुज्यम्, ५.निर्वाणम्।

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 02 | Issue: 04 | Dec - Feb, 2026 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

मुक्तिचिन्तामणिकाव्ये मुक्तिविषये वर्णितमस्ति। यथा –

विनाप्यष्टाङ्गयोगेन विनाप्यध्ययनानि च।
मुक्तिचिन्तामणिरेष मोक्षदः सर्वदेहिनाम्॥[१]

**१.दारुब्रह्ममूर्त्ति –**

गुह्य अवस्थितिः तत्त्वञ्च- श्रीक्षेत्रे पुरुषोत्तमः श्रीजगन्नाथस्य अवस्थिति तत्त्वञ्च परमं गुह्य प्रसङ्गं इति स्कन्दपुराणे वर्णितमस्ति। यथा-

पदात् पदात् श्रेष्ठतमः क्रमेण परिकीर्त्तितः
सिन्धुतीरे तु या ब्रह्मन् राजते नीलपर्वतः।
पृथिव्यां गोपितं स्थानं तवचापि सुदुर्लभाम्
सुरासुराणां दुर्ज्ञेयं माययाच्छादितं मम॥[२]

देवाः, दैत्याः, दानवाः, मरीचयः, महर्षयः अपि एतत् तीर्थविषये न जानान्ति। हे वराननने! (लक्ष्मी) एतत् मम एकं गोपनीयस्थानम्। ब्रह्मपुराणे अपि एतत् क्षेत्रं परमं गुह्यक्षेत्रमिति उच्यते।

समुद्रस्योत्तरे तीरे तस्मिन् देशे द्विजोत्तमाः
आस्ते गुह्यं परं क्षेत्रं मुक्तिदं पापनाशनं॥[३]

श्रीजगन्नाथस्य दारुरूपशरीरं तस्य कपटरूपमात्रम्। दीनजनानाम् अनुग्रहार्थम् अस्मिन् व्याजशरीरं धारणं कृत्वा नीलाचलेनिवासः उत्कलखण्डात् ज्ञायते।

एवं दयाम्वुधरसौ तसिन् नीलाचलेवसन्
दीनानाथानुग्रहाय दारुव्याज शरीरवान्॥[४]

संसारस्य सर्वं दुःखं प्रतिमा विनाशयति तथा अव्ययं सुखं प्रदानं करोति, अस्मिन् निमित्ते वेदान्ते दारुमयब्रह्म इति कथ्यते। केवलं काष्टमयी प्रतिमा मुक्तिदानं न करोति। यः मोक्षः स्वभावसिद्धः अकृतिमात् लब्ध सः कृतिमात् कथं सम्भवः।

**श्रीक्षेत्रः स्वयं विष्णोः आलयः-** अव्ययसुखदाता दारुब्रह्मनीलमाधवं प्रति दुष्टजनाः विश्वासं न कुर्वन्ति। अस्मिन् क्षेत्रं स्वयं विष्णोः आलयः तथा एतत् विग्रहसाक्षात् स्वयम्भुकर्त्तृक संस्थापितः।

**२. श्रीजगन्नाथः एव कृष्णः-**

जनानां तथा पुराणानामनुसारेण श्रीजगन्नाथः एव विष्णु। विष्णु कृष्णावतारे अत्र अवस्थानं कृतवान्। श्रीकृष्णस्य लीलास्थलं- वृन्दावनं, मथुरा, द्वारका इत्यादि स्थानम्। गोपकृष्णस्य लीला सह श्रीजगन्नाथक्षेत्रस्य कश्चित् सम्पर्कः संस्कृतपुराणेषु न दृश्यते। जगन्नाथक्षेत्रे कृष्णस्य अग्रजः वलरामः तथा भगिनी सुभद्रया सह निवासन्ति इति संस्कृतपुराणेषु

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 02 | Issue: 04 | Dec - Feb, 2026 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

ज्ञायते। अत्र श्रीकृष्णस्य स्वतन्त्रलीला प्रसङ्गे अपि उल्लेखं नास्ति।

श्रीकृष्णस्य द्वारका समुद्रे निमग्नः सन् महोदधिकूले तत् द्वारकापुरीमाहात्म्य प्रकाशते। अस्मिन् कल्पनायां जनाः पुरीं द्वितीयद्वारका तथा कलियुगद्वारका इति विवेचयन्ति। अस्मात् कारणात् अत्र श्रीकृष्णस्य कल्पनाविषये प्रसङ्गं प्राप्तम्। सर्वप्रथमे अस्मिन् क्षेत्रे नीलमाधवः शवरेभ्यः पूजा प्राप्तवान्। नीलमाधवः एव विष्णु तथा अन्तर्धानं पश्चात् सः कृष्णरूपे अस्मिन् क्षेत्रे प्रकाश्यते इति स्कन्दपुराणे वर्णनमस्ति। यथा- वलरामः, सुभद्रा तथा सुदर्शनस्य सह श्रीकृष्णः आविर्भूतः जातः।

वेष्टनं मोचयामास महावेद्या नृपोत्तमः
ददृशुस्ते तदा सर्वे रत्नसिंहासनस्थितम्।
रामं कृष्णं सुभद्राञ्च वासुदेवं सुदर्शनम्
यथोपविष्ट लेपादि संस्कारैः रुचिराकृतिम्॥[५]

तस्मिन् काले सर्वैः दृष्टं रत्नसिंहासनम् उपरि वलरामः, कृष्णः तथा श्रीकृष्णस्य चक्र सुदर्शनं विराजन्ते। रथयात्रा समये कृष्णः, जगन्नाथः, सुभद्रा तथा वलभद्रस्य रथः अपि कृष्णः, सुभद्रा, वलभद्रः रथः इति निर्देशते। ब्रह्मपुराणे जगन्नाथं कृष्णरूपे कल्प्यते। दर्शनविधि प्रसङ्गे वर्णितमस्ति-

वटस्य दर्शनं चैव व्युष्टिं तस्य च भोद्विजाः
दर्शनं वलदेवस्य कृष्णस्य विशेषतः।
सुभद्रायाश्च तथैव माहात्म्यं चैव सर्वशः
दर्शनं नरसिंहस्य व्युष्टि संकीर्त्तन तथा॥[६]

### ३. चतुर्द्धामूर्त्ति-

विष्णोः रूपम्- वलभद्रः, सुभद्रा, जगन्नाथः तथा सुदर्शनः इति मूर्त्तिचतुष्टयं विष्णोः रूपंम् इति स्कन्दपुराणे प्रकाश्यते। वलरामः कृष्णस्य मध्ये कश्चित् प्रभेदः नास्ति। सुभद्रा लक्ष्मीस्वरूपा तथा श्रीकृष्णस्य शक्तिस्वरूपा।

सुभद्रां चारुवदना वराब्जा-भयधारिणी।
लक्ष्मीः प्रादुर्वभूवेयं सर्वचैतन्यरूपिणी॥[७]

चारुवदना सुभद्रादेवी एकहस्ते वरपद्म अन्यहस्ते अभयञ्च धारयति। सा चैतन्यरूपिणी मूर्त्यन्ते प्रादुर्भूतम् अभवत्। अस्मिन् कृष्णावतारे रोहिणीगर्भे वलरामस्य चिन्तनं कारणात् बलभद्राभावेन जनिम् अभवत्। एकस्मिन् गर्भे जातः इति कारणात् लौकिकव्यवहारे सुभद्रा वलदेवस्य भगिनी, लक्ष्मी पुरुषः तथा स्त्रीरूपे सर्वत्र विद्यमानं भवति।

पुराणे चतुर्द्धामूर्ति रूपम्- अधूना मूर्त्याः यं रूपं दृश्यते तत् पुराणेषु वर्णितेषु रूपेषु बहवोः प्रभेदः अस्ति। सम्प्रति रूपं असम्पूर्णं इति कारणाति रूपं मनोहरं न दृश्यते किन्तु पुराणेषु वर्णितेषु रूपषु अतीव सुन्दरं दृश्यते। ब्रह्मपुराणे मूर्त्तिनिर्माण प्रसङ्गे वर्णितमस्ति, यत्-

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 02 | Issue: 04 | Dec - Feb, 2026 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

प्रथमं शुक्लवर्णाभं शारदेन्दुसमप्रभम्
अरक्ताक्षं महाकायं स्मटा विकटमस्तकम् ।[८]

इतोऽपि अन्ये विषयाः वर्णिताः सन्ति यत्- चतुर्द्धामूर्त्ति एव चतुर्वेद, चतुर्द्धामूर्त्ति एव सिद्धिरस्तु, , चतुर्द्धामूर्त्ति एव श्रवणं,नयनं,अधरं तथा नासिका, चतुर्द्धामूर्त्ति एव हरे राम कृष्ण हरे, नयनमेव त्रिमूर्त्ति ।

**४. आदिवासी देवता-**

ओडिशाराज्ये बहुनगरे तथा मध्यप्रदेशे बहवः शवरः दृश्यन्ते । तेषां उत्पत्तिसम्बन्धे बहु किम्बदन्ती अस्ति । यः शवरः श्रीकृष्णं हतः सः भवति शवरजात्याः आदिपुरुषः इति किम्बदन्त्याः ज्ञायते । अन्य एकः किम्बदन्त्याः ज्ञायते यत् तस्याः पूर्वपुरुषस्य नाम शवरः । सः अपि प्रदेशस्य सेओरीनारायणः निकटस्थ वने निवासः अकुर्वन् । तस्मिन् वने श्रीजगन्नाथस्य आविर्भावः अभवत् तथा शवरः तस्याः पूजावन्दना अकरोत् । ओडिशाराज्यस्य राज्ञः एकं मन्दिरं निर्माणं कृत्वा मन्दिरे श्रीजगन्नाथं वन्दना कुर्वन् इच्छति । सेओरिनारायणात् जरन्नाथम् आनीतुम् एकः ब्राह्मणम् अवदत् । ब्राह्मणः शवर पार्श्वे उपस्थितः स्यात् परन्तु शवरः व्यतीत अन्य कोऽपि जगन्नाथस्य अवस्थानं न ज्ञातम् । ब्राह्मणः बहु चेष्टायामपि जगन्नाथं द्रष्टुम् न शक्यते ।

**५. गीतायाः पुरुषोत्तमः एव जगन्नाथः**

पुरुषोत्तमक्षेत्रस्य नाम पुरुषोत्तमः नामानुसारेण भवति । पुरुषोत्तमः एव जगन्नाथः । पुरुषोत्तमस्य परिचयः वेदे तथा भगवद्गीतायाम् अस्ति । गीतायाः पुरुषोत्तमयोगे कथनम् अस्ति । यथा-

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणी भूतानि कूटस्थोक्षर उच्यते ।।[९]
यो मामेव मसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्वविद् भजति मां सर्वभावेन भारत ।।[१०]

संसारेऽस्मिन् क्षरश्चाक्षरः द्वयं पुरुषनामे ख्यातः । सर्वभूतब्रह्मादि क्षरः तथा चेतनारूपी भोक्ताः अक्षरः इति उच्यते । एतत् व्यतीतं अन्य यः उत्तमपुरुषः सः परमात्मा त्रिलोके अधिष्ठितं स्यात् तं धारयति । परमात्मा क्षरश्चाक्षरात् अपि उत्कृष्टः भवति । अस्मात् कारणात् लोकसमूहे तथा वेदे पुरुषोत्तमः इति ख्यातः । वैष्णवाः मतेन श्रीकृष्णः स्वयं पुरुषोत्तमः इति अर्जुनम् उक्तवान् । श्रीकृष्णः स्वयं परम्ब्रह्म तथा अन्य अवतारादि केवलम् अस्य अंशः ।

पुरुषोत्तमक्षेत्रे यस्य वृक्षस्य वर्णनम् अस्ति, तत् प्रलयकालेऽपि विद्यमानः भवति । एतत् वटवृक्षः योजनविस्तृतं तथा विष्णोः कलेवरस्वरूपम् । एतेन वृक्षेण सह गीतायाः पुरुषोत्तमयोगअध्याये वर्णितम्[११] अश्वत्थवृक्षस्य स्थितिसादृश्य नास्ति चेत् अयं वृक्षः संसाररूपीवृक्षः भवति ।

**उपसंहारः-**

संस्कृतसाहित्येषु ओडिआग्रन्थेषु च श्रीपुरुषोत्तमदेवस्य मुक्तिचिन्तामणिकाव्यं सर्वोत्कृष्टकाव्यरूपेण परिचितः ।

The Brāhmī, International Multidisciplinary Research Journal

(Peer Reviewed, Referred & Open Access Journal)

Volume: 02 | Issue: 04 | Dec - Feb, 2026 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

श्रीजगन्नाथस्य सर्वोत्तमसाररूपतत्त्वानां संकलनं कृत्वा मुक्तिचिन्तामणिकाव्ये तेषां तत्त्वानां सम्यग्र उपस्थापनं कृतम् । अस्मिन् काव्ये श्रीजगन्नाथतत्त्वं, मोक्षस्यसाधनानि ऐहिकपारलौकिकफललाभाय महत्त्वपूर्णादिशा निर्दिष्टा चास्ति । अत्र प्रसङ्गे कथं मुक्तिं प्राप्यते, केनसाधनेन ऐहिकफलं लभ्यते तस्य विचारः अपि शास्त्रेऽस्मिन् कृतः । दारुब्रह्म श्रीजगन्नाथस्य अवस्थितिः तत्त्वञ्च तस्य चतुर्द्धामूर्त्ति विषये अत्र वर्णनमस्ति ।

**पादटीका-**

१.मुक्तिचिन्तामणिः १म अध्याय

२.स्कन्दपुराण,उत्कलखण्डः प्रथमअध्यायः

३.ब्रह्मपुराण, ४२अ.

४.स्कन्दपुराण, उ.ख. ४५अ.

५. स्कन्दपुराण, उ.ख. १९अ.

६. .ब्रह्मपुराण, ४६अ.

७.स्कन्दपुराण, १९अ.

८.ब्रह्मपुराण, ५०अ.

९.श्रीमद्भगवद्गीता, पुरुषोत्तमयोग, १५.१६

१०.श्रीमद्भगवद्गीता, पुरुषोत्तमयोग, १५.१९

११. श्रीमद्भगवद्गीता, पुरुषोत्तमयोग, १५अ.

**सन्दर्भग्रन्थाः**

1. Swami, Nirliptananda, Glory of Lord Jagannath, from SriSkandaPurana [Part 1 & 2], The Divine Life Society, Uttarakhand, 2019.
2. Mishra, Ramachandra, Essence of Jagannath Culture, Gyan Prakash Mishra, Puri.
3. Prusti, Mathurendra, Sri Jagannatha Chetanare Vaisnava Tattva, Sri Jagannath Sanskruti Gavesana Parisad, Bhubaneswar, 2023.
4. Ray, Hrudananda, Sri Jagannatha Tattva Rahasya, Chinmaya Prakashan, Cuttack, 2010.
5. Rath, Dr. Rabi Charan, Muktichintamanih, Centre of Advance in Sanskrit Sri Jagannatha Sanskrit Vishvavidyalaya, Sri Vihar, Puri, Orissa, 2002.

*****